# 3 Yr. Degree/4 Yr. Honours 4th Semester Examination, 2025 (CCFUP)

## Subject : Sanskrit

## Course: SANS4011 (MAJOR)

**Full Marks: 60**

**Time: 3 Hours**

*The figures in the right hand margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

1. 'क' विभागात् सप्तप्रश्नानां 'ख' विभागात् त्रयप्रश्नानां च उत्तरं संस्कृतभाषया देवनागरीलिपिमाश्रित्य समाधीयताम्। 2×10=20

**विभाग:–'क:'**

(a) श्रद्धाशब्दस्य संज्ञा प्रदेया। को ज्ञानं लभते?

(b) 'तदात्मानं सृजाम्यहम्'–अत्र 'अहम्' इति पदेन को बोध्यते? स कदा आत्मानं सृजति?

(c) 'स कालेनेह महता योगो नष्ट: परन्तप'–अत्र वक्ता क:? कश्च परन्तप:?

(d) श्रीमद्भगवद्गीतायां कति श्लोका: विद्यन्ते? अस्य ग्रन्थस्य चतुर्थाध्यायस्य नाम किम्?

(e) तमाहु: पण्डितं बुधा:–बुधा: कं पण्डितं किमर्थञ्च ब्रुवते?

(f) कृत्वापि न निबध्यते–क: केन न निबध्यते?

(g) 'एवं परम्पराप्राप्तमिमम्'–अत्र का च परम्परा?

(h) स्वाध्यायज्ञानयज्ञस्य संज्ञा प्रदेया।

(i) 'भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्'–उत्तमं रहस्यं किम्? अत्र सखा शब्देन को बोध्यते?

(j) किं नाम 'अकर्म'?

**विभाग:–'ख'**

(k) ईशोपनिषद: नामान्तरद्वयम् उल्लिख्यताम्।

(l) ईशोपनिषदि कति मन्त्रा: विद्यन्ते? अस्या उपनिषद: कस्यचित् भाष्यकारस्य नाम लेखनीयम्।

(m) 'ईशोपनिषत्' कस्मिन् वेदे कस्यां संहितायां च प्राप्यते?

Please Turn Over

(n) 'विद्या' का? का च अविद्या?

(o) 'हिरण्मयेण पात्रेण सत्यस्यापिहितं मुखम् .....'—'हिरण्मयं पात्रम्' किम्? पूषन् इति पदेन को बोध्यते?

(p) 'न कर्म लिप्यते नरे'—इत्यस्य कोऽर्थ:?

2. अधोलिखितेषु यथेच्छं प्रश्नचतुष्टयं समाधेयम्। तन्मध्ये प्रश्नद्वयं अवश्यमेव संस्कृतभाषया समाधीयताम्। 5×4=20

(a) अर्थो लेखनीय:

चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागश:।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम्।।

(b) अर्थो लेखनीय:

असूर्या नाम ते लोका अन्धेन तमसावृता:।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना:।।

(c) सप्रसङ्गं व्याख्या कार्या।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।

(d) भावसम्प्रसारणं कुरु—

'तेन त्यक्तेन भुञ्जीथा मा गृध: कस्यस्विद्धनम्।'

(e) 'न कर्म निवध्नाति धनञ्जय'—धनञ्जय: क:? कर्मशब्देन किं कर्म बोध्यते? कर्माणि कं न निवन्धन्ति?

'न कर्म निवध्नाति धनञ्जय'—ধনঞ্জয় কে? কর্ম শব্দের দ্বারা কী বোঝানো হয়েছে? কর্মসমূহ কাকে বন্ধন করে না?

(f) 'त्यक्त्वा देहं पुनर्जन्म नैति'—क: कथं वा पुनर्जन्म न एति?

'त्यक्त्वा देहं पुनर्जन्म नैति'—কে কীভাবে আর পুনর্জন্ম প্রাপ্ত হন না?

3. अधोलिखितेषु प्रश्नेषु प्रत्येकं विभागादेकं प्रश्नं स्वीकृत्य प्रश्नद्वयस्य उत्तरं प्रदेयम्। 10×2=20

নিম্নলিখিত প্রশ্নগুলির মধ্যে প্রত্যেক বিভাগ থেকে একটি করে মোট দুটি প্রশ্নের উত্তর দাও।

**'क' विभाग:**

(a) श्रीमद्भगवद्गीतानुसारेण निष्कामकर्मयोग: क:? निष्कामकर्मयोगस्य स्वरूपं विस्तृतरूपेण आलोच्यताम्।

শ্রীমদ্ভগবদ্গীতানুসারে নিষ্কামকর্মযোগ কী? নিষ্কামকর্মযোগের স্বরূপ বিস্তৃতরূপে আলোচনা করো।

(b) 'श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञ: परन्तप'—ज्ञानयज्ञस्य स्वरूपं विशदेन प्रतिपाद्यताम्।

'श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञ: परन्तप'—জ্ঞানযজ্ঞের স্বরূপ বিশদরূপে প্রতিপাদন করো।

'ख' विभाग:

(c) ईशोपनिषदि आम्नातमात्म स्वरूपं यथायथं पर्यालोच्यताम्।

ঈশোপনিষদ অবলম্বনে আত্মার স্বরূপ যথাযথরূপে আলোচনা করো।

(d) ईशोपनिषदमवलम्ब्य सम्भूतेः असम्भूतेश्च स्वरूपम् आलोच्यताम्।

ঈশোপনিষদ্ অবলম্বনে সম্ভূতি এবং অসম্ভূতির স্বরূপ আলোচনা করো।

———